


श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# नारायण अथर्वशीर्ष

***nArAyaNa atharvashIrShaM***

# नारायण अथर्वशीर्ष

**सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।**
**तेजस्वि नावधीतमस्तु मा विद्विषावहै ।**

**ओं शान्तिः शान्तिः शान्तिः ॥**

ओं अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात्प्राणो जायते ।
मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।
नारायणाद्-ब्रह्मा जायते । नारायणाद्-रुद्रो जायते । नारायणादिन्द्रो जायते ।
नारायणात्प्रजापतयः प्रजायन्ते । नारायणाद्-द्वादशादित्या रुद्रा वसवः सर्वाणि च छन्दांसि ।
नारायणादेव समुत्पद्यन्ते । नारायणे प्रवर्तन्ते । नारायणे प्रलीयन्ते ॥

**एतत् ऋग्वेद शिरोयोऽधीते ॥**

ओं । अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः ।
द्यावापृथिव्यौ च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वश्च नारायणः ।
अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वम् ।
यद्भूतं यच्च भव्यम् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः ।
न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति ॥

**एतत् यजुर्वेद शिरोयोऽधीते ॥**

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् । ओमित्येकाक्षरम् ।
नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् ।
यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवस्सर्वमायुरेति ।
विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ।
य एवं वेद ॥

**एतत् सामवेद शिरोयोऽधीते ॥**

# नारायण अथर्वशीर्ष

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार उकार मकार इति ।

तानेकधा समभरत्तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् ।

ओं नमो नारायणायेति मन्त्रोपासकः । श्रीवैकुण्ठभुवनलोकं गमिष्यति ।

तदिदं परं पुण्डरीकं विज्ञानघनम् । तस्मात्-तदिदावन्मात्रम् ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम् । सर्वभूतस्थमेकं नारायणम् ।

कारण रूपमकार परब्रह्मोम् ॥

**एतत् अथर्व शिरोयोऽधीते ॥**

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

माध्यन्-दिनमा-दित्याभि-मुखोऽधीयानः ।

पञ्च पातकोप-पातकात्प्रमुच्यते । सर्व वेद पारायण पुण्यं लभते ।

नारायण सायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥

**सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।**

**तेजस्वि नावधीतमस्तु मा विद्विषावहै ।**

**ओं शान्तिः शान्तिः शान्तिः ॥**